National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 384-389
© 2026 NJHSR
www.sanskritarticle.com

**लोकनाथ पण्डा**
अतिथिप्राध्यापकः,
एकलव्यपरिसरः, अगरतला
केन्द्रीयसंस्कृतविश्वविद्यालयः

**Correspondence:**
**लोकनाथ पण्डा**
अतिथिप्राध्यापकः,
एकलव्यपरिसरः, अगरतला
केन्द्रीयसंस्कृतविश्वविद्यालयः

# ज्ञानगतप्रत्यक्षत्वप्रयोजकविचारः

**लोकनाथ पण्डा**

**शोधसारः**

**शोधसारः**- मोक्षश्च ब्रह्मज्ञानाद्भवतीति तस्मात् मोक्षसाधकं ब्रह्मज्ञानम्। ज्ञानं चात्र द्विविधं वृत्तिरूपं चिद्रूपञ्चेति । सविषयं वृत्तिरूपं निर्विषयं स्वप्रकाशं चिद्रूपमात्मैव **"प्रज्ञानं ब्रह्म"**[1], **"प्रज्ञानघन एव"**[2], **"सत्यं ज्ञानमनन्तं ब्रह्म"**[3] इत्यादिश्रुतिभ्यो ब्रह्मणो ज्ञानस्वरूपत्वावगमात्। ब्रह्मैव ज्ञानं ब्रह्मज्ञानं तच्चात्मसाक्षात्काररूपं तस्मादेव मोक्षसिद्धिः। चिद्रूपत्वाज्जीवात्मा मुक्तः सन्नप्यविद्ययाऽध्यस्तान्तःकरण-तादात्म्येन कर्तृत्वादिधर्माननुभवन् बद्ध इव भाति। अहं ब्रह्मास्मीत्यखण्डाकारवृत्त्याऽविद्याऽपनये सति स्वरूपमुपगतो मुक्त इति प्राप्तप्राप्तिरूपो मोक्षो न तु साध्यः। प्रमाणेन प्रमेयसिद्धिः, तस्मात्प्रमाणस्य प्राधान्यम्। षट् प्रमाणानि सन्ति। तेषु प्रत्यक्षं सर्वैरपि स्वीकृतम्। लक्षणं तु प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणम्। तदपि द्विविधं ज्ञानगतविषयगतभेदेन। तत्र ज्ञानगतप्रत्यक्षविषये शङ्कासमाधानरूपेण यथामति प्रतुष्टुषुः अस्मि ।

**कूटशब्दाः**- प्रमा, प्रत्यक्षम्, वृत्तिः, चैतन्यम्, अवच्छेदकम्, प्रमाता इत्यादयः।

**भूमिका**- चत्वारः पुरुषार्थाः सन्ति। अर्थ्यन्ते काम्यन्त इत्यर्थाः सुखानि। पुरुषस्य अर्थाः पुरुषार्थाः पुरुषसुखानि। ते च इह संसारे धर्मार्थकाममोक्षरूपाः प्रसिद्धाः। अत्र अर्थकामयोः पुरुषार्थत्वं धर्माविरोधेन न स्वतः।[4] भगवता उच्यते- **"धर्माविरुद्धभूतेषु कामोऽस्मि भरतर्षभ"**।[5] तत्र मोक्ष एव परमपुरुषार्थः। तस्य परमत्वं नित्यत्वेन। मोक्षस्य नित्यत्वबोधिका **"न स पुनरावर्तते"**[6] इति श्रुतिः। मोक्षेतरेषां धर्मार्थकामानां प्रत्यक्षेण अनित्यता सिद्धा। यद्यपि **"अपाम सोमममृता अभूम"**[7], **"अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्"**[8] इति श्रुतिभ्यां स्वर्गस्य नित्यत्वं प्रतिपाद्यते। तथापि **"तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते"**[9] इति श्रुत्या ऐहिककर्मचितलोकवदामुष्मिककर्म-चितस्वर्गस्यानित्यत्वं बोध्यते। तथा चानुमानम् **"स्वर्गोऽनित्यः कर्मजन्यत्वात् ऐहिकभोगवत्"** ऐहिकभोगेऽनित्यत्वं कर्मजन्यत्वञ्च सिद्धम्। यत्कर्मजन्यं तदनित्यमिति व्याप्तिबलात् स्वर्ग-स्यानित्यत्वमनुमानप्रमाणेनापि सिद्ध्यति। स्वर्गस्य नित्यत्वानित्यत्वबोधकश्रुत्योर्मध्येऽनुमानप्रमाण-वशात् अनित्यत्वबोधिकायाः श्रुतेरेव प्राबल्यम्। प्रमाणानां माहात्म्यं दरीदृश्यते वेदान्ते, तत्कथमिति अधस्तात् निरुप्यते।

**प्रमाणानां वेदान्ते उपयोगः-**

तत्र प्रत्यक्षप्रमा शब्दजन्यापि भ्रमबाधिका[10], बाधस्वरूपानुपलब्धिर्वा फलतः प्रत्यक्षप्रमा साक्षाद् द्वितीयमिथ्यात्वं व्यञ्जयति। एवमनुमानम्, अर्थापत्तिश्च। शब्दस्तु साक्षान्निर्विशेषं ब्रह्मापि सविशेषमिव बोधयन् साक्षात् ब्रह्मस्वरूपे, तथा द्वितीयमिथ्यात्वे च प्रमाणम्। उपमानफलं तु साम्यमिव वैधर्म्यमपि। तेन च द्वितीयस्य ब्रह्मविलक्षणत्वव्यञ्जनद्वारा सद्विविक्तत्वरूपं मिथ्यात्वं व्यज्यते। एवमद्वैतासाधारणे द्वितीयमिथ्यात्वे, ब्रह्मनिर्विशेषत्वे च यथासंभवं सर्वाणि प्रमाणान्युपयुज्यन्ते। न केवलमत्रैव, किन्त्वद्वैतिनामसाधारणेऽज्ञाने भावरूपेऽपि तान्युपयुज्यन्ते, इति यथासभवं प्रमाणानामुपयोगः।

वेदान्तनये प्रमा वृत्तिप्रतिबिम्बितचैतन्यं वृत्त्यभिव्यक्तचैतन्यं वा, न तु शुद्धचैतन्यम्, अज्ञाननिवर्तकत्वेन तस्य प्रमात्वायोगात्। **"घटस्य मे प्रत्यक्षं ज्ञानम्"** इति व्यवहाराज्ज्ञाननिष्ठत्वेन ज्ञानगतप्रत्यक्षत्वं **"घटो मे प्रत्यक्षः"** इत्यनुभवाद्विषयनिष्ठत्वेन विषयगतप्रत्यक्षत्वमिति द्विविधं प्रत्यक्षम्। ज्ञानगतप्रत्यक्षत्वप्रयोजकस्य प्रस्तुतत्वाद्विषयगत-प्रत्यक्षत्वप्रयोजकस्य प्रमात्रभेदस्य ज्ञानगतप्रत्यक्षत्वप्रयोजकाधीन-त्वादादौ ज्ञानगतप्रत्यक्षत्वं जिज्ञास्यम्।

**ज्ञानगतप्रत्यक्षम्-**

ज्ञानगतप्रत्यक्षत्वं नाम प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदः भवति।

**शङ्का– "एकमेवाद्वितीयम्"**[11] इति छान्दोग्यश्रुतेः चैतन्यस्य एकत्वं स्वीक्रियते। तस्मात्कथमुच्यते प्रमाणचैतन्यं विषयचैतन्यमिति ?

**समाधानम्-** स्वतोऽभिन्नस्याप्येकस्यैवात्मतत्त्वस्याविद्योपाधिवशेन घटाद्यवच्छिन्नचैतन्यं **विषयचैतन्यम्**, अन्तःकरणवृत्त्यवच्छिन्नचैतन्यं **प्रमाणचैतन्यम्**, अन्तःकरणावच्छिन्नचैतन्यं **प्रमातृचैतन्य**मित्यादि-रूपेण व्यवहारः वर्तते, अर्थात् व्यवहारकल्पितघटपटमठवृत्त्याद्य-वच्छेदकभेदादेव घटाकाशपटाकाशमठाकाशादिवत् व्यवहारकल्पितं घटावच्छिन्नचैतन्यपटावच्छिन्नचैतन्यमठावच्छिन्नचैतन्यादिरूपेण भिन्नं भवति, अर्थात् वृत्त्यवच्छिन्नचैतन्यघटावच्छिन्नचैतन्य-योवृत्तिघटांशयोरेव भेदः न तु चैतन्यांशे। फलतः अवच्छेद्यमेक-मवच्छेदकमनेकम्।

**शङ्का–** चैतन्ययोः कीदृशोऽभेदः प्रत्यक्षत्वप्रयोजकः?

**समाधानम्-** यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाद्याकारेण परिणमते। सैव परिणामो वृत्तिरित्युच्यते। सत्येवम् अन्तः करणवृत्तिस्वरूपप्रमाणस्य पटाद्यात्मकविषयस्य च चैतन्यावच्छेद-कस्य सम्पन्नायाम् एकदेशस्थतया तत्प्रयुक्तः प्रमाणावच्छिन्नचैतन्य-विषयावच्छिन्नचैतन्ययोरभेदः स्वीक्रियते। सैवाभेदः वृत्त्यात्मकज्ञान-निष्ठप्रत्यक्षत्वप्रयोजकोऽङ्गीक्रियते। अर्थात् ज्ञानगतप्रत्यक्षत्वप्रयोज-कस्य चैतन्याभेदस्य प्रयोजकं प्रमाणचैतन्यविषयचैतन्यावच्छेदक-योरुपाध्योरेकदेशस्थत्वम्। तस्य च प्रयोजकमन्तः करणवृत्तेर्विषय-देशगमनम्।

**शङ्का –** अनुमित्यादिपरोक्षवृत्तिस्थले कथं न प्रमाणचैतन्यविषय-चैतन्ययोरभेदः?

**समाधानम्-**अनुमित्यादौ तु विषयेन्द्रियसम्बन्धाभावेन तज्जन्य-स्यान्तः करणसंयुक्तेन्द्रियविषयसम्बन्धस्याभावान्न वृत्तेर्विषयदेश-गमनं तस्मात् प्रमाणचैतन्यविषयचैतन्यावच्छेदकयोरेकदेश-स्थत्वाभावे न तयोरभेदः। तथा चानुमित्यादेर्न प्रत्यक्षत्वम्।

**शङ्का–** ज्ञानगतप्रत्यक्षत्वप्रयोजको यः चैतन्याभेदः तत्प्रयोजकम-वच्छेदकयोरेकदेशस्थत्वं कथम्?

**समाधानम्-**

अन्तःकरणसंयुक्तेन्द्रियविषयसन्निकर्षादन्तःकरणवृत्तेर्बहिर्निर्गमने सति 'अयं घटः' इति प्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्रदेशे समवधानात् घटाद्यवच्छिन्नं तदाकारवृत्त्यवच्छिन्नञ्च चैतन्यमेकमेव।

**शङ्का-** घटादेरधिकरणं स्वोपादानं, वृत्तेश्च घटादिस्तत् कथमुभयोरेकत्र समवधानं, भिन्नाधिकरणत्वात्?

**समाधानम्–** घटाद्युपादानव्यापनाद् वृत्तेः समवधानोपपत्तेः। अतः एवोक्तं सिद्धान्तबिन्दौ – **"स च सावयवत्वात् परिणममानो देहाभ्यन्तरे घटादौ च सम्यग् व्याप्ये"**ति।

**शङ्का-** चैतन्यविभाजकयोरुपाध्योवृत्तिविषययोर्भेदात्कथं तदवच्छि-न्नचैतन्ययोरभेदः?

**समाधानम्-** यथा विभाजकयोरप्यन्तः करणवृत्तिघटादिविषययोरेक-देशस्थत्वेन भेदाजनकत्वादभेदः, मठान्तर्वर्तिघटावच्छिन्नाकाशो न मठाकाशाद्भिद्यतेऽत्रापि व्यधिकरणयोरेवाच्छेदकयोरवच्छेद्याभेदकत्वं तथा प्रकृतेऽपि।

**शङ्का–** ननु प्रत्यक्षस्थलेऽपि वृत्तिघटयोर्भेदाद्भिन्नोपाधिकयोः प्रमाणप्रमेयचैतन्ययोर्भेदावश्यंभावादुक्तप्रयोजकं तत्राव्याप्तमिति।

**समाधानम्-** उपाध्योरेकदेशस्थत्वमुपहिताभेदे प्रयोजकमिति नियमानुसारेणोपाधिः उपाधित्वेन उपहितचैतन्यस्याभेदाप्रयोजकः, 'अयं घटः' इति प्रत्यक्षस्थले घटाकारवृत्तेः घटसम्बन्धे सति विषयचैतन्यस्य नाम घटावच्छिन्नचैतन्यस्य, प्रमाणचैतन्यस्य नाम चैकदेशस्थितोपाधिद्वयावच्छिन्नत्वेनोपहितचैतन्याऽभेदः भवति। घटसंयुक्तघटान्तःकरणवृत्त्यवच्छिन्नचैतन्यस्य तस्मात्कारणादभिव्यक्तं चैतन्यं घटप्रत्यक्षमित्युच्यते।

**शङ्का–** सुखदुःखादीनां चक्षुरादीन्द्रियाणां सन्निकर्षाभावेऽन्तः करणस्य सुखाद्याकारवृत्तिरपि उत्पन्नं न भवति तदा सुखादिविषये कथं प्रत्यक्षत्वम् ?

**समाधानम्-** उपाध्योरेकदेशस्थत्वं कुत्रचित् स्वतः कुत्रचित् परतः। तत्रान्तरप्रत्यक्षे स्वतः, वृत्तिविषययोः सदैव एकस्मिन्देशे सम्बन्धात्। बाह्यप्रत्यक्षे तु परतः, तत्रोपाध्योः स्वतो भिन्नदेशत्वात्। सुखादीना-मान्तरप्रत्यक्षत्वमस्ति घटादिवत् बाह्यविषयत्वं नास्ति, तदर्थं प्रत्यक्षप्रमायां चक्षुरादीन्द्रियाणां सन्निकर्षः नापेक्षितः। सुखादीनामन्तःकरणधर्मत्वेन तेषामन्तःकरणदेशस्थत्वम्, सुखाद्या-कारा वृत्तिरपि तदान्तःकरणस्था इति सुखावच्छिन्नसुखाकार-

वृत्त्यवच्छिन्नचैतन्यस्योपाध्योरेकदेशस्थत्वेनोपहितचैतन्याभेदप्रयोजकमिति दिशा एकत्वात् सुखांशे प्रत्यक्षत्वम्।

**शङ्का**- इदानीमवच्छेदकयोरेकदेशस्थत्वमात्रस्यावच्छेद्याभेदे प्रयोजकत्वे तादृशचैतन्यात्मकावच्छेदकावच्छेद्याभेदस्य प्रत्यक्षत्वप्रयोजके 'अहं सुखी आसम्' इति प्रत्यक्षजन्ये अतीतसुखविषयके 'अहं सुखी आसम्' इति स्मरणे प्रत्यक्षत्वापत्तिर्दुर्वारा सुखतद्वद्वृत्त्योरन्तःकरणात्मकैकदेशस्थत्वेन सुखावच्छिन्नचैतन्यतद्द्वृत्त्यवच्छिन्नचैतन्ययोरभेदात्।

**समाधानम्**- अवच्छेदकयोरेकदेशस्थमात्रमवच्छेद्याभेदप्रयोजकं नापि तु एककालिकत्वसहितं तत्। एवं सति 'अहं सुखी आसम्' इत्याकारकसुखस्मृलतिकाले सुखस्यातीतत्वेन सुखतत्स्मृत्यात्मकवृत्त्योरेककालिकत्वाभावेन, तत्र नापत्तिः। अवच्छेदकयोरेककालिकत्वविशिष्टकदेशत्वस्यैव तदवच्छेद्यभेदाप्रयोजकत्वात्।

अतिव्याप्तिवारणायोपायान्तरम्- वर्तमानविषयावच्छिन्नचैतन्याभिन्नान्तःकरणवृत्त्यवच्छिन्नचैतन्यमेव ज्ञप्तिगतप्रत्यक्षत्वप्रयोजकम् अर्थात् वृत्तिवर्तमानविषययोरेकदेशस्थत्वेनोपहिताभेदे प्रयोजकम् इति। एवञ्चाहं सुखी आसम् इत्याकारकसुखस्मृतिस्थले वर्तमानत्वाभावेनान्तःकरणवृत्त्यात्मकप्रमाणावच्छिन्नचैतन्यस्य विषये सुखे सुखावच्छिन्नचैतन्यभेदेऽपि वर्तमानसुखावच्छिन्नचैतन्याभेदाभावात्प्रत्यक्षत्वप्रयोजकाभावेनातिव्याप्त्यभावान्न दोषावकाशः इति।

**शङ्का**- एककालीनत्वे सति एकदेशस्थत्वस्य अवच्छेदकद्वयगतस्यावच्छेद्याभेदप्रयोजकत्वे प्रमाणावच्छिन्नचैतन्यनिष्ठवर्तमानविषयावच्छिन्नचैतन्याभेदस्य ज्ञप्तिगतप्रत्यक्षत्वप्रयोजकत्वेऽपि च स्वीकृते स्वगतधर्माधर्मविषयकशाब्दबोधे प्रत्यक्षत्वापत्तिः, कथमिति चेत् कमपि धार्मिकं पुरुषं सम्बोध्य 'भवान् धार्मिकः' इति केनाप्युक्तम्, तेन च वाक्येन तस्य धार्मिकस्य 'अहं धार्मिकः' इति वाक्यार्थबोधः जातः। तादृशे शाब्दबोधे प्राप्तफलकशुभाशुभादिहेतुके 'अहं धार्मिकः' इत्यत्राव्याप्तिः। यतो हि वर्तमानधर्माधर्मावप्यन्तःकरणधर्मौ, तद्विषयिणी निरुक्तवृत्तिरप्यन्तःकरणस्यैव धर्मः इति विषयवृत्त्योरेककालीनत्वे सत्येकदेशस्थत्वं तत्र दोषः । एवञ्च तदवच्छिन्नचैतन्योरप्यभेदः दोषयुक्तः।

**समाधानम्**- नात्र केवलं वर्तमानत्वं विषयविशेषणमपितु योग्यत्वमपि, तथा च प्रमाणावच्छिन्नचैतन्यस्य वर्तमानयोग्यविषयावच्छिन्नचैतन्याभेदः ज्ञानगतप्रत्यक्षत्वप्रयोजकमिति पर्यवसितार्थो भवति। धर्माधर्मयोस्तु कदाचिदपि प्रत्यक्षविषयत्वाभावेन योग्यत्वाभावात् योग्यवर्तमानविषयपदेन धर्माधर्मयोरग्रहणान्न तत्तद्वृत्तिषु प्रत्यक्षत्वापत्तिः। उक्ततत्तद्धृत्यात्मकप्रमाणा-वच्छिन्नचैतन्यस्य वर्तमानयोग्यविषयावच्छिन्नचैतन्याभेदाभावात् । या या योग्यता सा सा किञ्चित् धर्मावच्छिन्ना इति नियमात्। योग्यतावच्छेदकमत्रानतीन्द्रियत्वं वेदितव्यम्।

**शङ्का**– यथा कामसङ्कल्पविचिकित्सादेरन्तःकरणधर्मस्य योग्यत्वं तथा धर्माधर्मयोरपि योग्यत्वमुचितमेव, तत्र कथमयोग्यत्वम् ?

**समाधानम्**- धर्मादीनाम् अन्तःकरणस्य धर्मत्वेऽपि तत्र किञ्चिदयोग्यं किञ्चिद्योग्यमर्थात् सुखादीनां प्रत्यक्षज्ञानविषयत्वादुद्भूतत्वम्, तेन चोद्भूतत्वेन तेषां योग्यत्वम्। अन्येषाञ्च धर्मादीनामप्रत्यक्षत्वादयोग्यत्वमिति भावः। अत्र फलबलकल्प्यः स्वभावविशेष एव शरणम्। अन्यथा न्यायमतेऽप्यात्मधर्मत्वाविशेषेऽपि सुखादिवद्धमदिः प्रत्यक्षत्वापत्तिर्दुवारा।

**शङ्का**– यदा यज्ञदत्तः सुखी, तदा यदि देवदत्तः तं सम्बोध्य 'त्वं सुखी' ति वाक्यं ब्रूते, तदा तादृशबाक्यजन्ये यज्ञदत्तीये 'अहं सुखी' ति शाब्दबोधे कथं न प्रत्यक्षत्वापत्तिः? तदानीं सुखात्मकविषयस्य वर्तमानत्वेन सुखात्मकवर्तमानविषयतद्वद्वृत्त्योः, अन्तःकरणात्मैकदेशस्थत्वस्यावच्छेद्यचैतन्याभेदप्रयोजकस्याक्षुण्णत्वात्।

**समाधानम्**- अस्माकं मतेऽपि वाक्यजन्यज्ञानमपरोक्षमेव शब्दादुत्पद्यमानस्यानावृतार्थविषयकज्ञानस्य प्रत्यक्षत्वाभ्युपगमेन लक्ष्यत्वात्तत्र प्रत्यक्षत्वापादनस्येष्टापादनतयाऽदोषत्वात्।

**शङ्का** – परोक्षज्ञानजननस्वभावस्य शब्दस्य कथमपरोक्षज्ञानजनकत्वं प्रमाणाभावात्।

**समाधानम्**- 'दशमस्त्वमसी'ति आप्तवाक्याज्जायमानं दशमत्वज्ञानमपरोक्षमेव, अन्यथा अपरोक्षस्य भ्रमस्यानिवृत्तेः अपरोक्षज्ञानमेव भ्रमनिवर्तकं भवति । तथा पञ्चदशीकाराः -

**"न मृतो दशमोऽस्तीति श्रुत्वाप्तवचनं तदा।**
**परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत् ॥**
**त्वमेव दशमोऽसीति गणयित्वा प्रदर्शितः।**
**अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति॥"** इति॥

**शङ्का**– वाक्यं यद्यपरोक्षज्ञानं स्यात्, तदा शाब्दबोधोच्छेदः स्यात्, समाने विषये परोक्षज्ञानसामग्रपेक्षया प्रत्यक्षज्ञानसामग्री बलवत्त्वात्।

**समाधानम्**- प्रमातृभिन्नार्थकस्य शब्दस्योवापरोक्षज्ञानजनकत्वमिति नियमः, नान्यस्य। अत एव सन्निकृष्टविषये प्रमातृभिन्नार्थविषयः इत्यर्थः, न तु इन्द्रियसन्निकृष्टे विषये इत्यवगन्तव्यम्। तथैव प्रमाणान्तरस्यापि प्रमातृभिन्नार्थविषयेऽपरोक्षज्ञानजनकत्वमस्तीत्यभिप्रायः।

**शङ्का**– अपरोक्षविषयकवाक्यात् यज्ज्ञानं भवति तदपरोक्षमिति चेत् पर्वतो वह्निमानित्यनुमितिस्थलेऽपि प्रत्यक्षत्वापत्तिः भवतीति चेत् अनुमित्यात्मकज्ञाने प्रत्यक्षत्वप्राप्तिः पर्वतांशे वा वह्न्यंशे वा?

**समाधानम्**- आदौ प्रमाणचैतन्यस्य विषयचैतन्याभेद इत्युक्तम्। इत्यनेनान्तःकरणवृत्त्यवच्छिन्नचैतन्यविषयचैतन्ययोरभेदः ज्ञप्तिगतप्रत्यक्षत्वप्रयोजकः इति पूर्वमेव प्रतिपादितम्। तादृशस्य चैतन्या-

भेदरूपस्य प्रत्यक्षत्वप्रयोजकस्य विद्यमानतया 'पर्वतो वह्निमान्' इत्यनुमितेः पर्वतांशेऽपरोक्षत्वमेव परन्तु विषयेन्द्रियसन्निकर्षाभावे इन्द्रियद्वारा नान्तःकरणवृत्तिनिर्गमनसम्भवः, अतः पर्वतो वह्निमान् इत्यनुमितिस्थले वहेर्व्यवहिततया इन्द्रियसन्निकर्षाभावात् नान्तः करणस्य वन्याकाराकारितासम्भवः तथा च वह्नितद्द्वृत्त्योर-वच्छेदकयोरेकदेशस्थत्वाभावेन, प्रयोजकाभावेन न वह्न्यवच्छिन्न-चैतन्यतद्द्वृत्त्यवच्छिन्नचैतन्ययोरभेदः, तस्माद्वह्न्यंशे परोक्षम्।

**शङ्का–** पर्वतो वह्निमानित्यादिज्ञानस्यानुमितित्वं सर्वलोकसिद्धम्। न च लोकसिद्धार्थस्य लक्षणेनान्यथात्वं युक्तम्। तथा च श्लोकवार्तिकम् –

**"सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः।**

**न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्॥"** इति ।

**समाधानम्-** सर्वेषामत्रानुभवः एव प्रमाणं न तु अनुव्यवसायः सिद्धान्ते तदनभ्युपगमात्, विषयज्ञानतज्ज्ञानयोर्यौगपद्यनियमात्, ज्ञानादीनां ज्ञातैकसत्त्वात्। न हि ज्ञानमुत्पद्यमानं साक्षिणाऽगृहीतं भवति। तथा च योगसूत्रम्– **"सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वादि"**ति । द्रष्टा हि विषयस्वरूपं यदा गृह्णाति, तदैव ज्ञानस्वरूपमपि। तत्र विषयो यादृशाकारस्तादृशाकारमेव तं गृह्णाति। पर्वतांशे ज्ञानं यद्यनुमितिरूपं स्यात्, तदा तदनुमितिरूपमेव गृह्णीयात् पर्वतमनुमिनोमीति, न च तथा तद्गृह्णाति। अत एव सर्वेषां ज्ञानग्रहणाकारः पर्वतं पश्यामीति। तस्मात् पर्वतांशे ज्ञानस्य प्रत्यक्षत्वम्, अतो न लोकविरुद्धम् ।

नैयायिकानां मते नैतत् सम्भवति यतः तेषां मते व्यवसायानन्तरमनुव्यवसायो भवति। तत्र विषयज्ञानं व्यवसायः इत्युच्यते। ज्ञानस्य ज्ञानं तु अनुव्यवसायः इत्युच्यते। प्रत्यक्षे ज्ञानविषयकज्ञानस्याकारो घटं पश्यामीति, वह्निमनुमिनोमीति, अर्थात् अर्थात् अनुमितौ तु घटविषयकज्ञानवानहमित्याकारः वह्निविषयकानुमितिज्ञानवानहमित्याकारः। तत्र पर्वतांशे ज्ञानं यदि अनुमितिरूपं स्यात्, तदा तदनुमितिरूपमेव गृह्णीयात् ज्ञानग्रहणाकारश्च पर्वतमनुमिनोमीति स्यात्। न च तथा नैयायिकानामपि। अतः पर्वतांशे ज्ञानं प्रत्यक्षमेवाभ्युपगन्तव्यम्, नाऽप्रत्यक्षम्।

**शङ्का–** नन्वेवमनुमितौ द्विरूपं चेज्ज्ञानं, सकलानुमितिस्थले पक्षांशे विधेयांशमात्रेऽनुमितित्वाभिमतं वा? एवं सति **'वह्निः एतत्पर्वतनिष्ठजनकतासम्बन्धेन एतद्धमविशिष्टत्वात्'** एवं **'पृथ्वी-परमाणवः गन्धवन्तः पृथ्वीत्वात् घटवत्'** इत्यादौ असन्निकृष्टवह्नि-परमाण्वंशेऽपि प्रत्यक्षत्वापत्तिः।

**समाधानम्-** तत्रानुमानेऽप्रत्यक्षपक्षकानुमितौ पक्षे साध्ये च ज्ञानं परोक्षमवगन्तव्यम्। अर्थात् यत्र प्रत्यक्षत्वे प्रयोजकसम्भवः तत्र प्रत्यक्षत्वमेव परन्तु तस्मिननुमाने एवं न भवति प्रत्यक्षत्वप्रयोजकस्य योग्यवर्तमानविषयावच्छिन्नचैतन्याभेदस्यासत्त्वात्, वह्निपरमाणोर-योग्यत्वात्।

**शङ्का–** नन्वेवमपि प्रयोजकमिदं सुरभि चन्दनमित्यादौ चाक्षुषप्रत्यक्षेऽव्याप्तम्। तत्र चन्दनांशप्रत्यक्षे योग्यवर्तमानविषया-वच्छिन्नचैतन्याभेदसत्वेऽपि सौरभांशप्रत्यक्षे तदभावात्, सौरभस्य चक्षुरिन्द्रियायोग्यत्वात्।

**समाधानम्-** इष्टापत्तिः, अत्रापि चनदनखण्डांशेऽपरोक्षम्, चैतन्यो-पाध्योश्चन्दनतदाकारवृत्त्योरेकदेशस्थत्वेन वृत्त्यवच्छिन्नविषयावच्छिन्नचैतन्ययोरभेदात्। सौरभांशे तु परोक्षं सौरभस्य चक्षुरिन्द्रियायोग्यतया तत्तदिन्द्रियवृत्त्यवच्छिन्नचैतन्या-भिन्नयोग्यवर्तमानविषयावच्छिन्नचैतन्यत्वयोग्यत्वघटितलक्षणस्य नाम रूपपस्याभावात्। तत्र हेतुः इन्द्रियाऽसन्निकृष्टतया इति।

यद्यपि नैयायिकैः सौरभांशे ज्ञानस्यापरोक्षत्वमभ्युपगम्यते, तैर्ज्ञानलक्षणसन्निकर्षाभ्युपगमात्, तस्य च ज्ञानलक्षणसन्निकर्षस्य स्वसंयुक्तमनस्संयुक्तात्मसमवेतज्ञानविषयत्वरूपस्य तत्र सत्त्वात्, तथापि सिद्धान्ते तदनङ्गीकारात् सौरभेणेन्द्रियसन्निकर्षाभावात् तदंशे ज्ञानं न प्रत्यक्षम्, किन्तु स्मृतिरनुमितिर्वा। तत्राघ्रातपूर्वे तस्मिन् चन्दनखण्डे सौरभज्ञानं स्मृतिः, अनाघ्रातपूर्वे त्वनुमितिः। तत्प्रयोगश्च चन्दनमिदं सुरभि चन्दनखण्डत्वात् सम्मतचन्दनखण्डवत् इति। तथा च परोक्षे सौरभज्ञाने लक्षणागमनं न दोषायेति भावः।

**शङ्का–** असन्निकृष्टपक्षकानुमितिस्थले पक्षस्य प्रत्यक्षत्वे यथा असन्निकृष्टत्वं बाधकम्, तथा इदं चन्दनं सुरभि चन्दनखण्डत्वात् चन्दनखण्डान्तरवत् इति सन्निकृष्टपक्षकानुमितिस्थले चन्दनखण्डां-ऽशेऽपरोक्षत्वं सौरभांशे परोक्षत्वमिति परोक्षत्वाऽपरोक्षत्व-योरभ्युपगमे प्रसिद्धजातिबाधकसाङ्कर्यप्रसङ्गो बाधको भवेत्। तथा चोक्तं किरणावल्याम्–

**"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।**

**रूपहानिः रससम्बन्धो जातिबाधकसंग्रहः॥"** इति।

तत्र **सङ्करश्च परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः**। यथा भूतत्वमाकाशे मूर्तत्वं मनसि विद्यते, अनयोः परस्परात्यन्ताभावसमानाधिकरणभूतत्वमूर्तत्वधर्मयोरेकत्र पृथिव्याप्तेजोवायुषु समावेशत्वात् सङ्करदोषः, तस्मान्न जातिः। तथैवापरोक्षत्वमयं घटः इति ज्ञाने परोक्षत्वं धर्मादौ विद्यते, अनयोः यरात्यन्ताभावसमानाधिकरणपरोक्षत्वापरोक्षत्वयोर्धर्मयोरेकत्र 'सुरभि चन्दनम्' इत्यत्र समावेशत्वात् सङ्करदोषः, तस्मान्न जातिसिद्धिः।

**समाधानम्-** इष्टत्वात्। अत्र घटत्वादीनां नैयायिकी परिभाषा जातिरिति। नीलघटत्वादीनामुपाधिरिति। तथा च जातित्व-

मुपाधित्वञ्च तत्ततसंप्रदायानां परिभाषामात्रम्। तर्हि जातित्वो-पाधित्वपरिभाषायाः सकलप्रमाणागोचरतयाप्रामाणिकत्वाज्जातिः किमपि नास्त्येव।

**शङ्का-** यद्यदिन्द्रियग्राह्यं तन्निष्ठा जातिस्तदभावश्च तदिन्द्रियग्राह्यः इति न्यायेन घटोऽयमित्यादिप्रत्यक्षैः घटादीनामेव घटत्वजातेरपि ग्रहणात् प्रत्यक्ष तत्र प्रमाणम्।

**समाधानम्-** परस्परं भिद्यमानेषु घटेषु घटोऽयं घटोऽयमित्येकाकारा प्रतीतिरुदेति। साऽनुगतप्रतीतिरिति अभिधीयते। तस्याश्च प्रतीतेर्विषयो न घटः, घटानां परस्परभेदाद् घटपटादिज्ञानवत् तज्ज्ञानानामप्याकारभेदापातात्, विषयभेदस्यैव ज्ञानाकाराभेद-कत्वात्। न चात्राकारभेदस्तमात्तत्प्रतीतेर्विषयः कश्चिद् घटगतानुगतो धर्मो वक्तव्यः। योऽयं सकलघटानुगतो धर्मः तद् घटत्वम्। तेन घटोऽयमित्याद्यनुगतप्रतीतेर्विषयतया घटत्वसिद्धावपि न तु तस्य जातित्वसिद्धिः तदन्तरेणापि तत्प्रतीतेर्निर्वाहात्।

**शङ्का-** ननु तथापि न तत्प्रमाणगोचरत्वाभावकूटात्मक-सकलप्रमाणागोचरत्वसिद्धिः, घटत्वादौ जातित्वस्यानुमानप्रमाण-गम्यत्वात्। तथा **'घटत्वादिकं जातिः नित्यत्वे सति अनेकसमवेतत्वात् सत्तावत्'** तर्हि तत्कथं घटत्वादेः जातित्वे न प्रमाणम्, अनुगतप्रतीतेरमानत्वेऽप्यनुमानस्य मानत्वात्।

**समाधानम्–** तथा चास्मिन्प्रयोगे जातित्वं साध्यम्, तच्च नित्यानेकसमवेतत्वम्। न च तत्क्वचित्प्रसिद्धम्, सिद्धान्ते कुत्रापि नित्यानेकसमवेतत्वरूपस्य जातित्वस्यानभ्युपगमात्, नित्यत्वा-भावात्, समवायाभावाच्च। तस्मात् साध्यस्य जातित्वस्याप्रसिद्ध्या हेतौ साध्यव्याप्तिग्रहाभावेन च तस्य व्याप्यत्वासिद्धत्वेन तत्साध्यकानुमितिर्न भवतीति।

**शङ्का–** ननु समवायो नासिद्धः, लक्षणप्रमाणसद्भावात्, तत्र लक्षणं तावत्- नित्यसम्बन्धत्वम्, प्रमाणन्तु-इह कपाले घट इति प्रत्यक्षम्, विशिष्टबुद्धिर्विशिष्यविशेषणसम्बन्धविषया विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानञ्च।

**समाधानम्–** न, लक्षणायोगात्, नित्यस्वरूपसम्बन्धे नित्यसंयोगे च तल्लक्षणस्यातिव्याप्तत्वात्। वेदान्तिनां मते न समवायसिद्धिः। तथा च घटादौ अनेकसमवेतत्वं नास्ति प्रागेवोक्तम्। अतोऽन्यदार्त्त-मित्यादिश्रुत्या सर्वस्यापि प्रपञ्चस्यानित्यत्वमवगम्यते। तथा च प्राग् घटादौ पक्षे नित्यानेकसमवेतत्वाभावस्य प्रमाणेनैवावगमात्तदनुमानं तत्प्रमाणबाधितमिति हेतोर्बाधितत्वान्न तेन हेतुना साध्यसिद्धिरिति भावः।

**शङ्का–** ननु यदि घटत्वादिकं न जातिः किं तर्हि ?

**समाधानम्-** चित्तादात्म्यमिति। घटावच्छिन्नचित्तादात्म्यस्य सर्वघटेष्वनुगमात्तेनैवानुगतप्रतीतिनिवहि न तदतिरिक्ता जातिः कल्पनीया। तस्यैव तु घटावच्छिन्नचित्तादात्म्यस्य लोके घटत्वेन व्यवहारः। एवं पटत्वादावपि बोध्यम्।

**शङ्का–** नन्वस्तु जातित्वपरिभाषायाः असिद्धिः, उपाधित्व-परिभाषायाः कुतः अप्रामाणिकत्वम्?

**समाधानम्-**
जातिभिन्नानुगतधर्मत्वमुपाधित्वमित्येवोपाधित्वपरिभाषा कार्या। सा च जातित्वसिद्धयधीना, अतः जातित्वासिद्धिमुपदर्श्य तदपि निरसनीयम्। नो चेत् घटत्वस्योपाधित्वमपि प्रत्यक्षानुमानयोरन्यथा-सिद्धत्वप्रदर्शनद्वारा निरसनीयम् अर्थात् नीलघटत्वादेरुपाधित्व-परिभाषा न प्रामाणिकी नीलोऽयं घटः इत्यादिप्रत्यक्षस्य उपाधित्वरूपसाध्याप्रसिद्धौ तत्साधकस्य नीलघटत्वसद्भावे मान्यता तस्योऽपाधित्वेऽमानत्वात् नीलघटत्वादिकमुपाधिः जातिभिन्न-सामान्यधर्मत्वादिवदित्यनुमानस्यानवकाशात्, समवायाद्यसिद्ध्योपाधित्वासिद्धेः च एवं निरसनीयम्।

**शङ्का–** ननु तिष्ठतु जात्युपाधिकथा। पर्वतो वह्निमानित्यत्र विरुद्धयोः परोक्षत्वापरोक्षत्वयोः कथमेकत्र सम्भवः?

**समाधानम्-** अन्तःकरणनिर्गमानिर्गमाभ्यां पर्वताकारायाः वन्यकारा-याश्च वृत्तेर्भेदावश्यकः, किन्तु तदुभयावच्छिन्नचैतन्यमेकमेव। तथा च एकस्मिन्नेव वृक्षे यथा शाखावच्छेदेन कपिसंयोगः मूलावच्छेदेन तु कपिसंयोगाभावः, तथा एकत्र चैतन्ये वृत्त्यात्मकावच्छेदकभेदेन परोक्षत्वापरोक्षत्योरव्याप्यवृत्तितया न कापि बाधा। अर्थात् तत्र वह्निविशिष्टपर्वताद्याकाराया अन्तःकरणवृत्तेर्पर्वताद्यांशस्य विषय-सम्बन्धाद्वृत्त्यवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्यस्य चाभेदात् तदंशावच्छेदे चैतन्येऽपरोक्षत्वम् विषयासम्बन्धाद्विषयावच्छिन्न-चैतन्यस्य प्रमाणचैतन्यस्य च भेदात्तदंशावच्छेदे चैतन्ये परोक्षत्वम्। 'अत एव पर्वतो वह्निमानिति ज्ञानम्' इत्यदिस्थले ज्ञानपदेन वृत्तिद्वयावच्छिन्नमेकं चैतन्यं ग्राह्यम्, ततो नासंङ्गतिः।

अधुना योग्यत्ववर्तमानत्वादीनां निवेशे परोक्षत्वापरोक्षत्व-योरवच्छेदक-भेदादेवैकज्ञानवृत्तिस्वीकारे च तत्तदिन्द्रिययोग्य-वर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तद्द्वृत्यवच्छिन्नज्ञानस्य तत्तदेव प्रत्यक्षत्वम्। इदमत्र अवधातव्यम्- ज्ञप्तिगतप्रत्यक्षत्वमित्यत्र **ज्ञप्तिपदेन चैतन्यस्य** ग्रहणे **स्वावच्छेदकवृत्तिविषयावच्छिन्न-चैतन्याभिन्नत्वं प्रत्यक्षत्व**मिति लक्षणं बोध्यम्। तथा हि **अयं घटः** इति प्रत्यक्षस्थले **स्वं-** अयं घट इति वृत्त्यात्मकज्ञानावच्छिन्नचैतन्यं **तदवच्छेदिकावृत्तिः-** अयं घट इति वृत्तिः, **तद्विषयो-** घटः तादृशघटा**वच्छिन्नचैतन्याभिन्नत्वं-** अयं घट इति वृत्त्यवच्छिन्न-चैतन्यात्मकज्ञप्तेः। इति लक्षणसमन्वयः। कुतः चैतन्ययोः तयोः

अभिन्नत्वमिति प्रश्नोत्थितौ, **अवच्छेदकयोर्द्वयोरेकदेशस्थत्वं चैतन्य-द्वयाभेदप्रयोजकमि**त्यादिस्मरणं विधेयम्। निरुक्तज्ञप्तिपदेन **वृत्तेविवक्षणे** तु **स्वविषयनिष्ठावच्छेदकतानिरूपितावच्छेद्यतावच्चैतन्याभिन्नचैतन्यनिष्ठावच्छेद्यतानिरूपितावच्छेदकत्वं प्रत्यक्षत्वमि**तिलक्षणं वेदितव्यम् । तथा हि- **अयं घट** इतिवृत्तेः प्रत्यक्षत्वे। विवक्षिते **स्वं**- तादृशी वृत्तिः, **स्वविषयः**- घटः, **तन्निष्ठावच्छेदकतानिरूपितावच्छेद्यतावत्, चैतन्यं, तदभिन्नं चैतन्यं-** "अयं घट" इतिवृत्त्यवच्छिन्नं चैतन्यं, **तन्निष्ठावच्छेद्यतानिरूपितावच्छेदकता** "अयं घट" इति वृत्तौ इति लक्षणसमन्वयः।[12]

उच्यते च अद्वैततत्त्वशुद्धिकारैरपि **"तत्र घटादिज्ञाने, तदाकार-वृत्त्यत्वच्छिन्ने घटदेशेऽन्तःकरणसंयोगवशात् घटतदाकारवृत्त्यो-रेकदेशस्थत्वेन तदवच्छिन्नचैतन्यस्य तदाकारवृत्त्यवच्छिन्नचैतन्यस्य च भेदाभावादभेदोपचाराल्लक्षणसमन्वयः। अत्र वृत्त्यवच्छिन्नेत्यत्र वृत्तितदवच्छिन्नान्यतरस्य ग्रहणात् ब्रह्मज्ञाने तदाकारवृत्तिमात्रे प्रमाणजन्ये लक्षणसमन्वयः।"**[13]

**सन्दर्भग्रन्थसूची-**


i. **ऐतरेयोपनिषत्** सानुवाद शाङ्करभाष्यसहित गीताप्रेस गोरखपुर

ii. **बृहदारण्यकोपनिषत्** सानुवाद शाङ्करभाष्यसहित गीताप्रेस गोरखपुर

iii. **तैतिरीयोपनिषत्** सानुवाद शाङ्करभाष्यसहित गीताप्रेस गोरखपुर

iv. **छान्दोग्योपनिषत्** सानुवाद शाङ्करभाष्यसहित गीताप्रेस गोरखपुर

v. **ऋक्संहिता** श्रीमत्सायणाचार्यविरचितभाष्यसमेता

vi. **श्रीमद्भगवद्गीता** सानुवाद शाङ्करभाष्यसहित गीताप्रेस गोरखपुर

vii. **पञ्चदशी** चौखम्बा संस्कृत प्रतिष्ठान, नारायण राम आचार्य "काव्यतीर्थ",१९८७

viii. **सिद्धान्तबिन्दुः** महेश रीसर्च ईन्स्टीट्यूट्, एस्. सुब्रमण्य शास्त्री, १९७८

ix. **वेदान्तपरिभाषा** चौखम्बा विद्या भवन, श्री पञ्चानन भट्टाचार्य शास्त्री, १९९०

x. **वेदान्तपरिभाषा भगवतीटीका,** लक्ष्मणपुरीयाखिलभारतीयसंस्कृतपरिषत्, हेमचन्द्र जोशी, संवत् २०२०

xi. **श्लोकवार्तिकम्,** श्री सद्गुरु पब्लिकेशन्, गङ्गानाथ झा, १९८३

xii. **योगसूत्रम्,** गीताप्रेस गोरखपुर

xiii. **न्यायसिद्धान्तमुक्तावली** चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१,पण्डित श्रीकृष्णवल्लभाचार्य,१९७२

xiv. **तर्कसङ्ग्रहः** चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१


**संदर्भः**

1. ऐतरेयोपनिषत्उ (५/३)
2. बृहदारण्यकोपनिषत् (४/१५/११)
3. तैतिरीयोपनिषत् (२/१/१)
4. अद्वैततत्त्वशुद्धिः पु.सं. १
5. श्रीमद्भगवद्गीता (७.११)
6. छान्दोग्योपनिषत् (८/१५/१)
7. ऋक्संहिता (६/४/११)
8. ऋक्संहिता (६/४/११)
9. छान्दोग्योपनिषत् (८/१/६)
10. वाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादिति वाच्यम्। इष्टत्वात्। "दशमस्त्व-मसि" इत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात्। वेदान्त-परिभाषा प्रत्यक्षपरिच्छेदः।
11. छान्दोग्योपनिषद् (६/२/१)
12. वेदान्तपरिभाषायाः भवतीटीकायाम्
13. अद्वैततत्त्वशुद्धिः प्रत्यक्षप्रमाणपरिच्छेदे